संस्कृत-वार्ता:

21.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- लोकसभा निर्वाचनस्य अवशिष्टचरणयो: प्रचार: तीव्रगत्या प्रचलति प्रधानमंत्रिणा भारतीय जनता पार्टीति दलस्य वरिष्ठ नेत्रा च नरेन्द्रमोदिना बिहारे उत्तरप्रदेशे च कृता भूरि जनसभा:।
- दिल्ल्या: राउज एवेन्यू न्यायानयेन अद्य आसवनीति-वंचना-धनशोधन-विषये पूर्व-उपमुख्यमन्त्रिण: मनीष सिसोदियावर्यस्य न्यायिक निगडन मई एकत्रिंशीं यावत् अग्रेसारितम्।
- ईरानदेशे राष्ट्रपति निर्वाचनं जून मासस्य अष्टाविंशति: दिनांके भविष्यति।
- पैराएथलेटिक महिलानां एफएकपंचाशत् क्लबथ्रो इति प्रतिस्पर्धायां भारतस्य क्रीडिका एकता-भ्यानः स्वर्णपदकं समर्जितवती।
- भारतीय पुरूष कनिष्ठ हॉकी समूहेन स्वस्य यूरोपयात्राय: आरम्भ: बेल्जियमोपरि विषयेन सह कृत:।

<u>मोदी बिहार</u>

प्रधानमंत्रिणा भारतीय जनता पार्टीति दलस्य वरिष्ठ नेता च नरेन्द्रमोदिना कथितं यत् कांग्रेस इति एकम् वंशवादीदलम् अस्ति। इदम् तु केवलं एकस्य परिवारस्य हिताय एव अस्ति। अद्य बिहार प्रदेशस्य मोतीहारी इति स्थाने एकां जनसभां सम्बोधयन् स: उक्तवान् यत् कांग्रेस इति दलस्य नेतृत्वे इंडी इति संयुति: लोकसभानिर्वाचने नूनमेव पराजयं प्राप्स्यति। स: कथितवान् यत् भ्रष्ठाचारे भारतविरोधीप्रचारे च सम्मिलितान् जनान् प्रजा यथोयोग्यं उत्तरं दास्यति। स: निर्धनजनोय: विद्युदापूर्त्या: महानसीयतवाती ईंधनस्य आपूर्त्या: अपि चर्चा कृतवान्। श्रीमोदिना प्रोक्तं यत्- एष: मोदी अस्ति येन प्रतिगृहं वातींधनप्रापणस्य दायित्वं निजस्कन्धे निर्व्यूढं एष: प्रतिगृहं स्वच्छं पेयं नलजलं प्रापयितुम् अहर्निशं परिश्रमं करोति। अत्रावसरे यमुना कांग्रेस इति दलम् आर.जे.डी. दलम् च समेत्य तस्य सहायकदलानि अधिक्षिप्तानि यत् एतै: दलै: जनसामान्या: केवलं प्रतिश्रुतिविधानमात्रेण पर्याकुलीकृता: सन्ति। प्रधानमंत्रिणा महाराजगंजस्य गोरियाकोठी इति क्षेत्रे एकस्यां अन्य जनसभायां उक्तावान् यत् इंडी इति संयुति: सांप्रदायिका जातिवादी वंशवादी च अस्ति।

राष्ट्रीयजनतादलस्य नेता तेजस्वी प्रसाद यादव: संयुते: प्रत्याशिनां समर्थने जीरादेई क्षेत्रे मोतीहारी शिवहर क्षेत्रे च सभां करिष्यन्ति।

श्री नरेन्द्रमोदी अद्य स्वनिर्वाचन क्षेत्रे वाराणस्यां मातृशक्ति सम्मेलने प्रतिभागं करिष्यन्ति।

देहल्या: सर्वेषां लोकसभाक्षेत्रेणां कृते शनिवासरे मई मासस्य पंचविंशति दिनांके सम्पत्स्यमानस्य निर्वाचनस्य प्रचारकार्यक्रम: चरमावस्थायां अस्ति। भारतीयजनतापार्टी इति दलस्य कांग्रेस दलस्य आमआदमीपार्टी इति दलस्य च नेतार: अत्युत्साहेन प्रचारकार्यक्रमे संलग्ना: सन्ति।

## दिल्ली-आप

देहल्या: राउज एवेन्यू न्यायानयेन अद्य आसव नीति भ्रष्टाचारेण सह सम्बद्धे धनशोधन विषये पूर्व-उपमुख्यमन्त्रिण: मनीष सिसोदियावर्यस्य न्यायिक निगडन मई एकत्रिंशीं पर्यन्तं अग्रेसारितम्। प्रकरणस्य अग्रिम वादश्रवणं मई एकत्रिंश्यां भविष्यति।

प्रवर्तन निदेशालयेन केन्द्रीय अन्वेषण अभिकरणेन च अस्याधारेण सिसोदियायै शैथिल्य प्रदानस्य विरोध: कृत: यत् अभियुक्तस्य असहयोगकारणेन प्रकरणे आरोपं निश्चेतुं सतत विलम्ब: जायमान: वर्तते।

## पंचमचरणस्य

पंचमचरणस्य मतदानस्य संपन्नानन्तरं अधुना यावत् पंचविंशति राज्येषु लोकसभाया: अष्टाविंशत्युत्तर चतुश्शतमितेभ्य: आसनेभ्य: मतदानं सम्पन्न जातं। अरूणाचलप्रदेशस्य सिक्किमस्य आंध्रप्रदेशस्य ओडिशाया: च त्रिषष्टि विधानसभासनानां कृतेअपि मतदानं सम्पन्न जातम्।

## बिहार-सारण

बिहारराजस्य सारण संसदीय निर्वाचनक्षेत्रे, छपराक्षेत्रस्य तेलपा थाना क्षेत्रे निर्वाचनानन्तरं दुरापन्न हिंसायां एक: जन: मृत्युमपगत:। द्वौ चान्यौ व्रणितौ सूच्यन्ते। अत्रावसरे द्वौ हिंसाया: आरोपिणौ निगडीकृतौ स्त:। तत्र स्थिति: नियंत्रणाधीना वर्तते आरक्षीबलानि च नियोजितानि सन्ति। सामाजिक संचारसंजालेषु व्यापन्ना: भ्रामक सूचनाया: नियंत्रणाय जनपदे द्विदिवसपर्यन्तं अन्तर्जालसेवा अवरोधिताश्िता।

## अद्य जापानदेशस्य कोबेनगरे विश्व

पैराएथलेटिकप्रतियोगितायां महिलानां एफ51 क्लबथ्रो इति प्रतिस्पर्धायां भारतस्य एकताभ्यानः सर्वोत्तमप्रक्षेपणाय स्वर्णपदकं समर्जितवती। भारतस्य कशिश लाकडा रजतपदकं, अल्जीरियादेशस्य नाड्जेट् बौचेर्फ् कांस्यपदकं च प्राप्तवती । एषा प्रतिस्पर्धा अस्य मासस्य पञ्चविंशतिः दिनाङ्कपर्यन्तं प्रचलिष्यति।

## झारखण्ड

झारखण्ड भाजपादलेन हजारीबागस्य लोकसभासांसदः जयन्तसिन्हा इत्यस्मै निर्वाचने मत न प्रदानस्य कारणं कथयतु इति सन्सूचना प्रसारिता। हजारीबागः, चत्रा-कोडर्मा-इत्यनेन सह ह्यः देशे सर्वत्र पञ्चमचरणस्य मतदानं, झारखण्डे द्वितीयचरणस्य च मतदानं अभवत्। दलस्य राज्यमहासचिवेन आदित्यसाहू इत्यनेन एषा सूचना प्रख्यापिता यत् सिन्हा इत्यनेन मताधिकारस्य प्रयोगः न कृतः येन कारणेन दलस्य अपमानम् जातम्।

ईरान-राष्ट्रपति-निर्वाचनम्

ईरानदेशे राष्ट्रपति निर्वाचनं जून अष्टाविंशति: दिनांके भविष्यति। इमं निर्णयं ईरानदेशस्य अन्तरिमराष्ट्रपते: मोहम्मद मोखबर मुख्य न्यायाधीश: गुलाम होसेन मोहसेनी-एजेई संसद अध्यक्ष: मोहम्मद बाकर कालिबफ श्च सम्भूय एकास्मिन् सम्मेलने गृहतिवन्त:। इत: प्राक् ईरानदेशस्य सर्वोच्च नेता अयातुल्ला अली खामनेई महोदयै: हेलिकॉप्टर दुर्घटनायां राष्ट्रपति इब्राहिम रईसी इत्यस्य मृत्यो: अनन्तरम् उपराष्ट्रपति मोहम्मद मोखबरं अन्तरिम राष्ट्रपतिरूपेण नियुक्ति कृता:।

हॉकी

भारतीय पुरूष कनिष्ठ हॉकी समूहेन स्वस्य यूरोपयात्राय: आरम्भ: बेल्जियमोपरि विषयेन सह कृत:। अस्मिन् विजये भारत पक्षत: शारदानन्द तिवारी द्विवारं लक्ष्यसन्धानं कृतावान् । निर्धारित समये उभावपि समूहौ द्वे.द्वे इति समानमेव अंकयो: आस्ताम् तदनन्तरं स्पर्धाया: परिणाम: शूटआउट इत्यनेन जात:। भारतं स्वकीया द्वितीयां स्पर्धां श्व: नीदरलैंड स्य ब्रेडायां बेल्जियमेन सह खेलिस्यति।

।। इति वार्ता: ।।